# सकर्मकत्वाकर्मकत्वविमर्शः

**नागेन्द्र गौतमः**
उपप्राध्यापकः, व्याकरणविभागः
नेपालसंस्कृतविश्वविद्यालयः, जनताविद्यापीठम् दाङः, नेपालः
Email- nagendragautam235@gmail.com

## सारसङ्क्षेप

प्रस्तुतोऽयमालेखः सकर्मकत्वाकर्मकत्वविषये कौण्डभट्टनागेशयोः लक्षणसमन्वये केन्द्रितोऽस्ति। अष्टाध्याय्यां महर्षिपाणिनिना अकर्मकपदप्रयुक्तानि "अकर्मकाच्च" इत्यादीनि दश सूत्राण्युपदिष्टानि सन्ति। सकर्मकपदप्रयुक्तं "उदश्चरः सकर्मकात्" इत्येकं सूत्रं विद्यते। कर्मसहितत्वं सकर्मकत्वम्, कर्मरहितत्वमकर्मकत्वमिति सकर्मकाकर्मकयोः सामान्यलक्षणे स्वीकारे जीव्धातोः प्राणरूपकर्मसहितत्वात् सकर्मकत्वं स्यात्, इष्यते तु अकर्मकत्वम्। एवञ्च 'मासम् आस्यते' इत्यत्र मासकर्मरूपसाहित्यात् आस्धातोः कर्मराहित्यं नास्तीति अकर्मकत्वं न स्यात्। अत एव धात्वर्थफलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वम्, धात्वर्थफलसमानाधिकरणव्यापारवाचकत्वमकर्मकत्वमिति कौण्डभट्टादयः वैयाकरणाः। नागेशभट्टस्तु शब्दशास्त्रीयकर्मसंज्ञकार्थान्वय्यर्थकत्वं सकर्मकत्वम्, शब्दशास्त्रीयकर्मसंज्ञकार्थानन्वय्यर्थकत्वमकर्मकत्वम्। अत एव 'अध्यासिता भूमयः' इत्यत्र अधिपूर्वकस्य आस्धातोः सकर्मकत्वं सिद्ध्यति। अन्यथा प्राचीनाभिमतनिर्दिष्टे लक्षणे अङ्गीक्रियमाणे अधि+आस्+क्त (कर्मणि प्रयोगे) अकर्मकत्वमेव, अतः क्तप्रत्ययः कर्मणः अनुक्तत्वादध्यासितशब्दस्य द्वितीया स्यात्। इत्थं नागेशाभिमशब्दशास्त्रीयलक्षणस्वीकारे न कोऽपि दोषः। एतेन सर्वं सुसङ्गतं भवतीति आलेखस्यान्ते निष्कर्षोऽपि प्रदत्तो विद्यते। एतेन प्रस्तुतोऽयमालेखः सकर्मकत्वाकर्मकत्वविषयावबोधने जिज्ञासूनां कृते सहयोगी भविष्यतीत्यपेक्ष्यते।

**शब्दकुञ्जी :** लक्षणम्, व्यधिकरणम्, शब्दशास्त्रीयः, सकर्मकः, अकर्मकः।

## विषयपरिचय

सकर्मकाकर्मकज्ञानं विना तत्र शाब्दबोधं वर्णयितुं न शक्यते। अकर्मकपदार्थः कः ? सकर्मकपदार्थः कः ? किं नाम अकर्मकत्वम् ? किं नाम सकर्मकत्वम् ? इति जिज्ञासायां कर्मसहितो यो धातुः सः सकर्मकः, कर्मरहितो यो धातुः सोऽकर्मक इति सामान्यलक्षणमायाति। कर्मणा सह इति विग्रहे "तेन सहेति तुल्ययोगे" (पा.सू., २/२/२८) इति सूत्रेण बहुव्रीहिसमासे सकर्मकशब्दस्य सिद्धिर्भवति। अविद्यमानं कर्म यस्य सः इति विग्रहे "नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः" (कात्यायनवार्तिकम्, २/२/४) इति वार्तिकेन बहुव्रीहिसमासे अकर्मकः शब्दः सिद्ध्यति। सकर्मकेभ्यः अकर्मकेभ्यः धातुभ्यः कस्मिन्नर्थे लकारा भवन्तीति व्यवस्थायां महर्षिपाणिनिना सूत्रयति- "लः कर्मणि च भावे चाकर्मकेभ्यः" (पा.सू., ३/४/६९)। लकाराः सकर्मकेभ्यो धातुभ्यः कर्मणि कारके भवन्ति, चकारात् कर्तरि च। अकर्मकेभ्यो धातुभ्यः लकाराः भावे भवन्ति, चकारद्वयग्रहणात् उभयत्र (कर्तरि) इति सम्बध्यते। सकर्मकेभ्यः कर्मणि यथा- ब्राह्मणेन विद्या पठ्यते, कर्तरि हि- ब्राह्मणः विद्यां पठति। अकर्मकेभ्यः भावे - देवदत्तेन आस्यते, हस्यते। कर्तरि यथा- देवदत्तः आस्ते, हसति। एवञ्च सकर्मकाकर्मकयोः लक्षणयोः विषये प्राचीनैरुक्तम्-धात्वर्थफलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वम्। यथा- चैत्रः तण्डुलं पचति इत्यत्र विक्लित्तिरूपं फलं तण्डुले, फूत्कारादिव्यापारः च चैत्रे। एवं द्वयोः वैयधिकरण्यं पच्धातोः वर्तते, अतः पच्धातुः सकर्मकः। धात्वर्थफलसमानाधिकरणव्यापारवाचकत्वमकर्मकत्वमिति। यथा- देवदत्तः आस्ते इत्यत्र उभयोः सर्वथा सामानाधिकरण्यम्, अतोऽयमेव धातुरकर्मकः।

नव्यास्तु व्याकरणशास्त्राभिमतो यः कर्मसंज्ञकार्थः कर्मसंज्ञकत्वेन गृहीतोऽर्थस्तस्य अन्वय्यर्थकत्वं सकर्मकत्वम् । तेन चैत्रः तण्डुलं पचति इत्यत्र शब्दशास्त्रं "कर्तुरीप्सिततमं कर्म" (पा.सू., १/४/४९) इति । शब्दशास्त्रीयकर्मसंज्ञकार्थः तण्डुलपदार्थः । तण्डुलान्वयार्थः पाकक्रिया, पाकक्रियावाचकत्वं पच्धातोः वर्तते । अतः पच्धातोः सकर्मकत्वं सिद्ध्यति । आलेखेऽस्मिन् सकर्मकत्वाकर्मकत्वविषयविवेचने सैद्धान्तिकाधारम् अध्ययनविधिं च प्रदर्श्य सिद्धान्तानुसारं प्राच्यनव्यव्याकरणदृष्ट्या सकर्मकाकर्मकलक्षणं तदुदाहरणञ्च प्रस्तूय फलमात्रं धात्वर्थ इति वदतां मीमांसकानां मतं निरस्य च सिद्धान्तदृष्ट्या फलव्यापारयोरेव धात्वर्थ इति मतमुपस्थापितं वर्तते ।

## सैद्धान्तिकाधारः

अस्यानुसन्धानात्मकस्यालेखस्य परिपुष्टये जनताविद्यापीठस्य पुस्तकालये, केन्द्रीयपुस्तकालये च उपलब्धाः व्याकरणसम्बद्धाः अर्थग्रन्थाः सैद्धान्तिकाधारेण गृहीताः सन्ति । व्याकरणशास्त्रस्य प्रामाणिकाः ग्रन्थाः द्वितीयस्रोतस्त्वेन निर्धारिताः । विशेषतः व्याकरणदर्शनम्, वैयाकरणभूषणसारः, परमलघुमञ्जूषा, वाक्यपदीयम्, वैयाकरणसिद्धान्तकौमुदी चेत्यादिग्रन्थाः सैद्धान्तिकाधारत्वेन स्वीकृताः । एतादृशसैद्धान्तिकाधारे सकर्मकाकर्मकयोः सामान्यविशेषलक्षणं तयोः नागेशाभिमतेन लक्षणसमन्वयञ्च विधायायमालेखः सञ्जीकृतः ।

## अध्ययन विधिः

इदमनुसन्धानं विशेषतः पुस्तकालयीयविधिमवलम्ब्य विहितम् । अत्र व्याकरणदर्शनसम्बद्धेभ्यः अर्थग्रन्थेभ्यश्च सामग्रीणां सङ्कलनं विहितं वर्तते । सङ्कलितानां सामग्रीणां विश्लेषणं च कृत्वान्ते निष्कर्षः प्रस्तुतो विद्यते ।

## विषय विश्लेषणम्

**(क) कौण्डभट्टमतम्-**

सकर्मकत्वाकर्मकत्वव्यवस्था व्यापारस्य धात्वर्थं स्वीकृत्यैव सुसङ्गता भवति, नान्यथा । धातोः स्वार्थभूतो यो व्यापारस्तस्यासमानाधिकरणं यत्फलं तद्वाचकत्वे सकर्मकत्वम्, तत्समानाधिकरणं यत्फलं तद्वाचकत्वे अकर्मकत्वमिति । उक्तमेव यथा-

फलव्यापारयोरेकनिष्ठतायामकर्मकः ।
धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः ॥ (भट्टः, सन् २००४, पृ. १३१)

धात्वर्थः फलं व्यापारश्च तयोरेकनिष्ठतायां संस्थितौ अकर्मक इत्युच्यते । फलव्यापारयोः आधारयोः भिन्नाश्रये सति सकर्मक इत्युच्यते । यथा- नायकः सभां सम्बोधयति इत्यत्र फलव्यापारयोः भिन्नाधारयोः सत्वात् सकर्मक इत्युच्यते । तेन हि गमेः फलस्य कर्तृनिष्ठत्वेऽपि तस्याकर्मकत्वं न, कुतः ? फलस्य कर्मस्थत्वेन च तयोः समानाश्रयत्वाभावादिति । अकर्मकस्योदाहरणम्- भू सत्तायाम्, सत्ता=उपस्थितिः, प्रादुर्भवनम्, आत्मधारणं वा तदनुकूला क्रिया च तयोरेकैवाधारो भवति कर्ता । फलव्यापारयोराश्रयभेदे विशेषणभेदेन आधारभेदे सति सकर्मकता सिद्ध्यति । तच्च पच्यादीनामिव गम्यादीनामपि वर्तते । तथा चोक्तं वाक्यपदीये-

आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते।
अन्तर्भावाच्च तेनासौ कर्मणा न सकर्मकः ॥ (भर्तृहरिः, सन् २०१६, पृ. ७२)

धातुना आत्मानं फल व्यापाररूपमानं बिभ्रत=आत्मधारणानुकूलां क्रियां धारयत, आसी इति व्यवह्रियते । येन स्वरूपधारणकर्मणा सह क्रियान्तर्भावात्=फलव्यापारयोरेकस्मिन् अधिकरणे प्रवेशात् असौ धातुः न सकर्मकः । येन कर्मणा -आत्मधारणकर्मणा स्वशरीरधारणया सकर्मकत्वं न सम्भाव्यते । यतः फलव्यापारयोः पृथगन्वये सति सकर्मकत्वनियमात् । अत्र अन्तर्भावात्-फलांशेन सह व्यापारस्य सामानाधिकरण्यात् समानं तुल्यमेकमभिन्नमधिकरणसत्वात् धात्वर्थतावच्छेदकशरीरे

आत्मरूपकर्मण: प्रवेशात्, अभेदाच्च अकर्मक एव भवितुमर्हति। कर्मणा सह यो वर्तते स सकर्मक इति वक्तुं न शक्यते। यत: सर्वे धातव: कर्मणा सह वर्तन्ते। येन पृथगुपस्थितिरेव सकर्मकता। ननु 'आत्मानं जानाति' इत्यत्र ज्ञानरूपफलस्य ज्ञानजनकव्यापारस्य च कर्तरि विद्यमानात्, एकाधिकरणकमकर्मकलक्षणं संघटते । कथं ज्ञाधातौ सकर्मकता ? एवम् आत्मानमिच्छति इत्यत्रापि, इच्छारूपफलस्य तदनुकूलक्रियायाश्च विषयतासम्बन्धेन आत्मनि विद्यमानात् अकर्मकता प्रतिभाति । कथं सकर्मकता ? इत्याशंकायां "कर्मवत् कर्मणा तुल्यक्रिय:" (पा.सू., ३/१/८७) इति सूत्रसम्बद्धभाष्यमनुसृत्य नागेशः वदति यत्- द्वावात्मानौ अन्तरात्मा शरीरात्मा च। अन्तरात्मा तत्कर्म करोति येन शरीरात्मा सुखदुखेऽनुभवति। शरीरात्मा तत्कर्म करोति येन अन्तरात्मा सुखदुखेऽनुभवति (भट्टः सन् २००६, पृ. १४५) तेन फलव्यापारयो: भिन्नाधिकरणत्वं सकर्मकत्वमिति लक्षणम् आत्मानं जानाति इत्यादौ बोध्यम्।

**(ख) मीमांसकमतम्**

मीमांसका मण्डनमिश्रपुर:सरा हि फलस्यैव धात्वर्थत्वं व्यपारस्य तु तिङ्प्रत्ययार्थत्वं मन्यन्ते । यथा पाक: इत्यत्र विक्लित्तिर्धात्वर्थ: पाकानुकूलव्यापारस्तु घञ्प्रत्ययार्थ इति। एकस्मिन्नेव फले एकाधिकव्यापारसम्भवात् व्यापारस्य धात्वर्थत्वे गौरवं स्यात्। तेन हि गम्धातोरर्थ: अन्यस्थानसंयोग:, पततेरर्थोऽधोवर्तिप्रदेशसंयोग:, त्यजतेस्तु विभागोऽर्थ: । एतादृशफलानामुत्पादको यो व्यापार: स प्रत्ययगम्य इति । तन्न स्वीकार्यम्, तथा स्वीकारे हि कतिपयदोषा आपद्यन्ते। तत्र प्रथमं तु मतमिदं "ल: कर्मणि च भावे चाकर्मकेभ्य:" (पा.सू., ३/४/६९) इति पाणिनीयसूत्राशयविरुद्धम्। सूत्रमिदं गङ्गाप्रवाहन्यायेन "कर्तरि कृत्" (पा.सू., ६/४/६७) इति सूत्रमनुवृत्य प्रवर्तते। तेन ल: कर्मणि कर्तरि अकर्मकेभ्यो भावे च भवतीति तस्याशय:।

एतेन कर्मार्थे कर्त्रर्थे च लकारो भवति तथैव लादेशानां, तिबादीनामपि स एवार्थो न तु व्यापार: । यतो हि पचति - पाकं करोति, पक्ष्यति - पाकं करिष्यति, पक्ववान् - पाकं कृतवान् इत्यत्र विद्यमानानां त्रयाणां पृथक्प्रत्ययानां व्यापारबोधकशक्ते: कल्पनमावश्यकं यद्धि भवेन्महदेव गौरवम् । तदपेक्षया धातावेव शक्तिकल्पनं लाघवाय भवति । यदि हि पचति इत्यत्र व्यापाररूपफूत्कारादि: प्रत्ययार्थो भवति, तदा गच्छति इत्यत्रापि प्रत्ययस्य स एवार्थ: स्यात्। किन्तु न तथा। यदि च पचति इत्यत्र तिप्रत्ययस्य फूत्कारादिव्यापारवाचकत्वं नान्यत्रेति कथ्यते तदा प्रत्ययेषु प्रत्येकं शक्तिकल्पनाऽवश्यकी भवति। वस्तुतस्तु धातुपार्थक्येन पचति इत्यत्र गच्छति इत्यत्र च प्रत्ययस्य प्रतीति: पृथगेव। तेन धातावेव शक्तिकल्पनमुचितम्, न तु प्रत्ययेषु।

एवञ्च व्यापारस्य प्रत्ययार्थत्वे यथा मीमांसकमतस्वीकारे सकर्मकाकर्मकव्यवहारादापत्ति: । यथोक्तं नागेशेन- "सकर्मकाकर्मकाव्यवहारोच्छेदापत्तिः:" (भट्टः, सन् २००६, पृ.१२८) । सकर्मकेभ्य: कर्तरि कर्मणि च, अकर्मकेभ्य: कर्तरि भावे च लकारा भवन्तीति व्यवहारोऽपि न स्यात्। यतो हि सकर्मकत्वाकर्मकत्वव्यवस्था व्यापारस्य धात्वर्थं स्वीकृत्यैव सुसङ्गता भवति, नान्यथा । धातो: स्वार्थभूतो यो व्यापारस्तस्यासमानाधिकरणं यत्फलं तस्य वाचकत्वे सकर्मकत्वं तत्समानाधिकरणं यत्फलं तद्वाचकत्वे अकर्मकत्वमिति। अत्र मीमांसका: कथयितुं शक्नुवन्ति यद् व्यवस्थेयं तदा सुसङ्गता भवति यदा स्वार्थशब्दस्थाने प्रत्ययार्थशब्द: पठ्यते, येन प्रत्ययार्थव्यापारव्यधिकरणफलवाचकत्वं सकर्मकत्वं तत्समानाधिकरणफलवाचकत्वमकर्मकत्वमिति सिद्ध्येत। एवमेव प्रत्ययार्थव्यापाराश्रयत्वं कर्तृत्वं तद्व्यधिकरणफलाश्रयत्वं कर्मत्वमित्यपि व्यवस्था सङ्गच्छत एव । अत्रोच्यते यत् प्रत्ययार्थव्यापाराश्रयत्वं कर्तृत्वमिति तर्हि घटं भावयति इत्यादौ घटस्य कर्मत्वं न स्यात्। नात्र घट: णिच्प्रत्ययार्थभूत-प्रेरणाव्यापारस्याश्रयस्तेन तस्य नैव कर्तृत्वमपि। "गतिबुद्धि....."(पा.सू.,१/४/५२) इति सूत्रेण अणौ य: कर्ता, तस्यैव णौ कर्मसंज्ञा भवति। यच्चोच्यते नैव भवेदत्र घटस्य "गतिबुद्धि..." इत्यादिना कर्मसंज्ञा, किन्तु तस्य तु णिच्प्रत्ययार्थभूतप्रेरणा-व्यापारव्यधिकरणोत्पत्तिरूपफलस्याश्रयत्वं तु घटेऽस्त्येव, येन तस्य "कर्तुरीप्सिततमं कर्म" (पा.सू., १/४/४९) इति सूत्रेण कर्मसंज्ञा भवत्येवेति, तन्न अभिधानं तिङादिभि: अनभिधानं तैरनुक्तत्वं तयोर्या व्यवस्था प्रबन्ध: "अनभिहिते" (पा.सू.,२/३/१) इत्यधिकृत्य कर्मणि द्वितीया कर्तरि तृतीया अभिहिते तु उभयत्र प्रथमेति तस्या उच्छेदापत्ते:।

एवमेव व्यापारस्य प्रत्यार्थकत्वे गुरुशिष्याभ्यां पाचयति इत्यत्र प्रयोजकस्य गुरोर्व्यापारस्तु णिजर्थः, यतो हि प्रयोजकव्यापाराभिधानायैव "हेतुमति च" (पा.सू., ३/१/२६) इति सूत्रेण णिच्प्रत्ययविधानं कृतमस्ति। मीमांसकमते प्रयोज्यव्यापारस्तु तिङर्थ एव। यदाऽख्यातं प्रयोज्यव्यापारमधिदधाति तत्सम्बद्धप्रयोज्यभूतशिष्यपदे तिङर्थभूतसङ्ख्यया अप्यन्वयः कार्यो येन द्वयोरेव समानवचनस्य प्रयोग आवश्यकः सङ्ख्याया अपि तिङर्थत्वात्। येन पाचयति इत्यस्य सम्बन्धेन शिष्यपदेऽप्येकवचनापत्तिरथवा शिष्याभ्यामित्यस्य सम्बन्धेन पाचयति इत्येतस्य द्विवचनापत्तिः।

**(ग) नागेशभट्टमतम्**

धात्वर्थफलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वम्, धात्वर्थफलसमानाधिकरणव्यापारवाचकत्वमकर्मकत्वमिति सकर्मकस्य अकर्मकस्य च लक्षणं प्राचीनाः वैयाकरणाः उक्तवन्तः। ईदृशे लक्षणे अङ्गीक्रियमाणे दोषा भवन्ति। यथा- हरिः वैकुण्ठे शेते इत्यत्र केवलं शीङ्धातोः प्रयोगः तदा कर्मसंज्ञा नैव भवति। यतो हि शयनरूपाश्रये हरिः तादृशकर्तृद्वारा आश्रय वैकुण्ठपदार्थः, अतः कर्तृद्वारा क्रियाधारत्वात् अधिकरणसंज्ञायां सत्यां सप्तमी विभक्तिर्जायते। अयं च धातुः अकर्मकः। किन्तु यदा अधि+शीङ् इत्यस्य प्रयोगो भवति, तदा हरिः वैकुण्ठमधिशेते इत्यत्र अधिकरणसंज्ञायां प्राप्तायां तं प्रबाध्य "अधिशीङ्स्थासां कर्म" (पा. सू.,१/४/४६) इति सूत्रेण कर्मसंज्ञा विधीयते। धात्वर्थयोः मध्ये कश्चन भेदो नास्ति, धात्वर्थः समानः। तच्च कर्मानुक्तत्वाद् द्वितीयायां सत्यां हरिः वैकुण्ठमधिशेते इति प्रयोगः। धात्वर्थफलसमानाधिकरणव्यापारवाचकत्वात् अधि+शीङ् इत्यस्य अकर्मकत्वमेव। अतः कर्मणि प्रत्ययस्य साधुत्वं न सिद्ध्यति।

वस्तुतः इदमत्र ज्ञेयम्- सूत्रमिदं कारकसंज्ञां कर्मसंज्ञाञ्च करोति। सूत्रेऽस्मिन् द्वे पदे स्तः। अधिशीङ्स्थासामिति षष्ठीबहुवचनान्तं पदम्। कर्म इति प्रथमान्तं पदम्। आधारोऽधिकरणम् इति सूत्रात् आधार इति पदमत्रानुवर्तते। कारकमित्यधिकारोऽधत्रागच्छति। अत्र अधिशीङ्स्थासामिति पदं समस्तमस्ति। अस्य च विग्रहो भवति- शीङ् च स्था च आस् चेति शीङ्स्थासः। अधिः पूर्वः येषान्ते अधिपूर्वाः। अधिपूर्वाः च ते शीङ्स्थास इति अधिशीङ्स्थासः। तेषाम् अधिशीङ्स्थासाम्। अत्र द्वन्द्वादौ श्रूयमाणस्य अधिशब्दस्य प्रत्येकं द्वन्द्वावयवैः सह सम्बन्धो भवति। एवञ्चास्य पदस्यार्थो भवति यत्- अधिपूर्वकशीङ्धातोः अधिपूर्वकस्थाधातोः अधिपूर्वकास्धातोश्च प्रयोगे आधारकारकसंज्ञः सन् कर्मसंज्ञः भवतीत्यर्थः। तेन शयनस्य आधारस्य वैकुण्ठस्य प्राप्तमधिकरणसंज्ञां प्रबाध्यानेन सूत्रेण कर्मसंज्ञा भवति। अतः हरिः वैकुण्ठमधिशेते इत्यत्र द्वितीया भवति।

एवञ्च अध्यासिताः भूमयः इत्यत्र धात्वर्थफलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वं लक्षणमिति स्वीकारे अधि+आस् इत्यस्य अकर्मकत्वमेव, अतः क्तप्रत्ययः कर्मणः अनुक्तत्वात् अध्यासितशब्दस्य द्वितीया स्यात्। अत एव इत्थं प्राचीनसम्मतं सकर्मकत्वाकर्मकत्वयोः लक्षणस्वीकारे व्याकरणशास्त्रे दोषग्रस्तत्वात् स्वसम्मतां तत्परिभाषामुपस्थापयति नागेशभट्टः- शब्दशास्त्रीयकर्मसंज्ञकार्थान्वय्यर्थकत्वं सकर्मकत्वम्, शब्दशास्त्रीयकर्मसंज्ञकार्थानन्वय्यर्थकत्वमकर्मकत्वम् (भट्टः सन् २००६, पृ.१४३)। शब्दशास्त्रीयः व्याकरणशास्त्राभिमतो यः कर्मसंज्ञकार्थः कर्मसंज्ञकत्वेन गृहीतोऽर्थस्तस्य अन्वय्यर्थकत्वम् अन्वययोग्यार्थकत्वम्-सकर्मकत्वम्। तदनन्वितार्थकत्वम् अकर्मकत्वम्। यथा- अध्यासिता भूमयः इत्यत्र एतद्लक्षणेन शब्दशास्त्रम्- "अधिशीङ्स्थासां कर्म" (पा.सू., १/४/४६) इति शब्दशास्त्रीयकर्मसंज्ञकार्थः भूमिपदार्थः। भूमिपदार्थान्वय्यार्थः आसनक्रिया, आसनक्रियावाचकत्वम् अधिपूर्वक-आस्धातो वर्तते। अतोऽधिपूर्वकस्य आस्धातोः सकर्मकत्वं सिद्ध्यति। परन्तु प्राचीनैः निर्दिष्टे धात्वर्थफलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वमिति लक्षणे स्वीकारे अधि+आस् इत्यस्य अकर्मकत्वमेव, अतः क्तप्रत्ययः कर्मणः अनुक्तत्वात् अध्यासितशब्दस्य द्वितीया स्यात्। एवञ्च चैत्रः तण्डुलं पचति इत्यत्र शब्दशास्त्रं "कर्तुरीप्सिततमं कर्मः" (पा. सू., १/४/४९) शब्दशास्त्रीयकर्मसंज्ञकार्थः तण्डुलपदार्थः, तण्डुलान्वयार्थः पाकक्रिया। पाकक्रियावाचकत्वं पच्धातोः वर्तते। अतः पच्धातोः सकर्मकत्वं सिद्ध्यति। चैत्रः जीवति इत्यत्र शब्दशास्त्रीयकर्मसंज्ञकार्थः प्राणपदार्थः, प्राणपदार्थान्वय्यार्थः धारणक्रिया। धारणक्रियावाचकत्वं जीव्धातोः वर्तते। अतः जीव्धातोः सकर्मकत्वं स्यात्, तन्निवारयितुमुच्यते- धात्वर्थः बहिर्भूतकर्मसंज्ञकान्वया

र्थकत्वं सकर्मकत्वम् ।

एतत् सर्वं "सुप: आत्मन: क्यच्" (पा.सू.,३/१/८) इत्यस्य महाभाष्ये उक्तम्- 'अथाऽस्य क्यजन्तस्य कानि साधनानि भवन्ति ? भाव: कर्ता च । अथ कर्म, नास्ति कर्म । ननु चायमिषि: सकर्मक: यस्यायमर्थे क्यज्विधीयते । अभिहितं तत्कर्मान्तर्भूतं धात्वर्थ: सम्पन्न: । न चेदानीमन्यत्कर्मास्ति, येन सकर्मक: स्यात् । कथं तस्येयं सकर्मको भवति ? अपुत्रं पुत्रमिवाचरति पुत्रीयति माणवकमिति । अस्त्यत्र विशेषः, द्वेऽत्र कर्मणि । उपमानकर्मोपमेयकर्म च । उपमानकर्मान्तर्भूतमुपमेयेन कर्मणा सकर्मको भवति.....' इत्यादि (भट्टः, सन् २००६, पृ. १४४)

### अकर्मकशब्दतात्पर्यार्थबोधकानि दशसूत्राणि

**क) अकर्मकाच्च (पा.सू., १/३/२६)**

प्रथमाध्यायस्य तृतीयपादस्य षड्विंशतिसूत्रमिदम् । उपपूर्वकात् तिष्ठतेरकर्मकादात्मनेपदं स्यात् इति सूत्रस्यार्थ: । 'भोजनकाले उपतिष्ठते' इत्युदाहरणम् । धातोः क्रियावचनादकर्मकत्वं न सम्भवतीति तस्मादयुक्तमकर्मकादिति विशेषणम्, व्यवच्छेद्याभावादित्यत आह- "अकर्मकक्रियावचनादिति । अकर्मिका चासौ क्रिया चेत्यकर्मकक्रिया, तस्या वचनो यः, तां वक्ति सोऽकर्मकक्रियावचनः। एतेनार्थद्वारकं विशेषणमिदं दर्शयति- अकर्मको यो धात्वर्थस्तत्साहचर्यादभिधेयधर्मस्याभिधानोपचारात् धातुरकर्मक इति । अर्थस्य च युक्तमेतद्विशेषणम्, तस्य सकर्मकत्वाकर्मकत्वसम्भवात् । "यावद्भुक्तम्" इति । यावच्छब्दो निपातोऽव्ययम्, तस्य यथार्थे वीप्सायामव्ययीभावः, सप्तम्यन्तञ्चैतत् । अत एवाह- "भोजने भोजने सन्निधीयते" इति । "भावे क्तः" इति । "नपुंसके भावे क्तः" ३।३।११४ इत्यनेनेति ।

**ख) अकर्मकाच्च (पा.सू., १/३/३५)**

प्रथमाध्यायस्य तृतीयपादस्य पञ्चत्रिंशत्सूत्रम् । विपूर्वात् करोतेरकर्मकाद् अकर्मकक्रियावाचकादात्मनेपदं भवति । विकुर्वते सैन्धवाः, छात्रा विकुर्वते/विकारं लभते इत्युदाहरणानि।

**ग) अकर्मकाच्च (पा.सू., १/३/४५)**

प्रथमाध्यायस्य तृतीयपादस्य एकोनपञ्चाशत्सूत्रम् । जानातेरकर्मकात् अकर्मकक्रियावाचकादात्मनेपदं भवति । 'सर्पिशो जानीते' इत्युदाहरणम्।

**घ) अनोरकर्मकात् (पा.सू., १/३/४९)**

प्रथमाध्यायस्य तृतीयपादस्य एकोनपञ्चाशत्सूत्रम् । अनुपूर्वाद् वदतेरकर्मकाद् व्यक्तवाग्विषयादात्मनेपदं भवति । 'अनुवदते कठ: कलापरस्य' इत्युदाहरणम् ।

**ङ) विभाषाऽकर्मकात् (पा.सू., १/३८५)**

उप-पूर्वात् रमतेरकर्मकाद् विभाषा परस्मैपदं भवति । 'उपरमति/उपरमते वा' इत्युदाहरणम् ।

**च) अणावकर्मकाच्चित्तवत्कर्तृकात् (पा.सू.,१/३८८)**

अण्यन्तो यो धातुरकर्मकश्चित्तवत्कर्तृकश्च कर्मकश्च चित्तवत्कर्तृकश्च तस्माद् ण्यन्तात् परस्मैपदं भवति । 'शेते कृष्णस्तं गोपी/शाययति 'इत्युदाहरणम् । कर्त्रभिप्रायक्रियाफलविवक्षायाम् आत्मनेपदापवादः परस्मैपदं विधीयते । अण्यन्तो यो धतुरकर्मकश्चित्तवत्कर्तृकश्च तस्माद् ण्यन्तात् परस्मैपदं भवति । आस्ते देवदत्तः, आसयति देवदत्तम् । शेते देवदत्तः, शाययति देवदत्तम् । हेतुमण्णिचो विधिः । प्रतिषेधोऽपि प्रत्यासत्तेस्तस्य एव न्याय्यः । तस्मादिह चेतयति इति परस्मैपदेन एव भवितव्यम् । इदं तु प्रत्युदाहरणम् आरोहयमाणं प्रयुङ्क्ते आरोहयते ।

**छ) गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ (पा.सू.,१/४/५२)**

गतिश्च, बुद्धिश्च प्रत्यवसानं च गतिबुद्धिप्रत्यवसानानि, तानि अर्थाः येषां ते गतिबुद्धिप्रत्यवसानार्थाः, द्वन्द्वगर्भः बहुव्रीहिः । शब्दः कर्म यस्य तत् शब्दकर्म, गतिबुद्धिप्रत्यवसानार्थाश्च शब्दकर्म च अकर्मकश्चेति गतिबुद्धिप्रत्यवसानार्थशब्दकर्मा कर्मकाः, तेषां ० बहुव्रीहिगर्भः द्वन्द्वः । अर्थशब्दः प्रत्येकम् अभिसम्बध्यते । गत्यर्थानां बुद्ध्यर्थानां प्रत्यवसानार्थानाम् च धातूनां, तथा शब्दकर्मकाणाम् अकर्मकानाम् च अण्यन्तानाम् यः कर्ता, स ण्यन्तानां कर्मसंज्ञो भवति । गच्छति माणवको ग्रामम्, गमयति माणवकं ग्रामम् । याति माणवको ग्रामम्, यापयति माणवकं ग्रामम् । गत्यर्थेषु नीवह्योः प्रतिषेधो वक्तव्यः । नयति भारम् देवदत्तः, नाययति भारम् देवदत्तेन । वहति भारम् देवदत्तः, वाह्यति भारं देवदत्तेन । वहेरनियन्तृकर्तृकस्य इति वक्तव्यम् । इह प्रैत्षेधो मा भूत्, वहन्ति यवान् बलीवर्दाः, वाहयति यवान् बलीवर्दानिति । बुद्धिः बुध्यते माणवको धर्मम्, बोधयति माणवकं धर्मम् । वेत्ति माणवको धर्मम्, वेदयति माणवकं धर्मम् । प्रत्यवसानम् अभ्यवहारः । भुङ्क्ते माणवक ओदनम्, भोजयति माणवकम् ओदनम्। अश्नाति माणवकं ओदनम्, आशयति माणवकमोदनम् । आदिखाद्योः प्रतिषेधो वक्तव्यः । अत्ति माणवक ओदनम्, आदयते माणवकेन ओदनम् । खादति माणवकः, खादयति माणवकेन । भक्षेरहिंसार्थस्य प्रतिषेधो वक्तव्यः । भक्षयति पिण्डीं देवदत्तः, भक्षयति पिण्डीं देवदत्तेन इति । शब्दकर्मणाम् अधीते माणवको वेदम्, अध्यापयति माणवकं वेदम् । पठति माणवको वेदम् । पाठयति माणवकं वेदम् । अकर्मकाणाम् आस्ते देवदत्तः, आसयति देवदत्तम् । शेते देवदत्तः, शाययति देवदत्तमित्युदाहरणानि ।

**ज) चलनशब्दार्थादकर्मकाद्युच् (पा.सू.,३/२१४८)**

चलनार्थेभ्य: शब्दार्थेभ्यश्च अकर्मकेभ्यो धातुभ्य: ताच्छीलादिषु कर्तृषु युच् प्रत्ययो भवति । चलन:,चोपन:,शब्दन:,रवण: उदाहरणानि।

**झ) ल: कर्मणि च भावे चाकर्मकेभ्य: (पा.सू.,३/४/६९)**

ल:-लकारा: सकर्मकेभ्य: धातुभ्य: कर्मणि कारके भवन्ति, चकारात् कर्तरि च, अकर्मकेभ्य: धातुभ्य: लकारा: भावे भवन्ति, चकारात् कर्तरि च । द्विचकारग्रहणात् उभयत्र (कर्तरि) इति सम्बद्धते । अकर्मकग्रहणात् सकर्मका: अपि धातव: स्वयमेव आक्षिप्ता: भवन्ति । ल: कर्मणि च इति वाक्यद्वयमिदं सूत्रम् । "लः कर्मणि चे"ति प्रथमं वाक्यम् । "ल" इति प्रथमाबहुवचनान्तम् । चकारेण "कर्तरि कृ"दित्यतः "कर्तरी"त्यनुकृष्यते । "धातो"रित्यधिकृतम् । लकाराः कर्मणि कर्तरि च धातोः स्युरिति लभ्यते । सकर्मकधातुविषयोऽयम् । अकर्मकेषु "कर्मणी"त्यस्य बाधितत्वात् । तदाह लकाराः सकर्मकेभ्य इति । एवं च सकर्मकेभ्यो भावे लकारा न भवन्ति । सकर्मकेभ्योऽपि भावलकारप्रवृत्तौ तु "देवदत्तेन घटं क्रियते" इत्यादौ भावलकारेण कर्मणोऽनभिहितत्वाद् द्वितीया स्यादिति भावः । "भावे चाकर्मकेभ्यः" इति द्वितीयं वाक्यम् ।

अत्रापि चकारेण कर्तैवानुकृष्यते, न तु कर्म, असंभवात् । तदाह- अकर्मकेभ्यो भावे कर्तरि चेति । अत्राऽकर्मकग्रहणेन अविवक्षितकर्मका अपि गृह्नन्ते । तेन "देवदत्तेन भुज्यते" इत्यत्र सतोऽप्योदनरूपकर्मणोऽविवक्षायां भावे लकारोऽस्त्येव । सकर्मकेभ्यो न भवन्ति भावे लकारा इत्यपि एतेन सूत्रेण ज्ञाप्यते । सकर्मकेभ्योऽपि भावलकारप्रवृत्तौ तु भावलकारेण कर्मणोऽनभिहितत्वात् "देवदत्तेन घटं क्रियते" इत्यादौ द्वितीया स्यात् । सूत्रे चकारद्वयोपादानमुभयत्र वाक्ये कर्त्तरि इत्यनुपकर्षणार्थम्, येन सकर्मकेभ्योऽकर्मकेभ्यश्च कर्त्तरि लकारा भवन्तीति ज्ञायते (शास्त्री, सन् २००४, पृ. ६) इति ।

**ञ) गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च (पा.सू., ३/४/७२)**

गत्यर्थ-अकर्मक-श्लिष-शीङ्-स्था-आस-वस-जन-रुह-जीर्यत्येषां दशानां द्वन्द्वः । "लः कर्मणि च भावे चे"त्यतो भावे कर्मणीति "आदिकर्मणि क्तः कर्तरि चे"त्यतः कर्तरि इति चानुवर्तते । तदाह- एभ्य इत्यादिना । कर्तरीत्येवानुवृत्तौ भावकर्मणोर्न स्यादिति तयोरप्यनुवृत्तिः । गङ्गां गत इति । कर्तरि क्तः गत्यर्थेभ्यो धातुभ्योऽकर्मकेभ्य श्लिषादिभ्यश्च य: क्त: स कर्तरि भवति । चकारात् यथाप्राप्तं च भावकर्मणो: । गतो देवदत्तो ग्रामम्, गतो देवदत्तेन ग्रामम् । ग्लानो भगवान्, ग्लानं भवता । गुरुः भवान्,

उपश्लिष्टो गुरुर्भवता, उपश्लिष्टं भवता । उपशायितो गुरुं भवान्, उपशायितो गुरुर्भवता । उपासितो गुरुं भवान्, उपासितो गुरुर्भवता, उपासितं भवता इत्यादीनि उदाहरणानि।

**घ) सकर्मकशब्दतात्पर्यार्थबोधकमेकं सूत्रम्-**

**क) उदश्चर सकर्मकात् (पा.सू.,१/३/५३)**

प्रथमाध्यायस्य तृतीयपादस्य त्रिपञ्चाशत्सूत्रम् । "शेषात् कर्तरि परस्मैपदम् (पा.सू., १/३/७८) इति सूत्रेण परस्मैपदे प्राप्ते उत्पूर्वाच्चरधातो: सकर्मकक्रियावचनादात्मनेपदं भवतीति सूत्रस्यार्थ: । गेहम् उच्चरते, कुटुम्बम् उच्चरते, गुरुवचनम् उच्चरते उदाहरणानि ।

**निष्कर्ष:**

व्याकरणशास्त्रज्ञाभिमतमाधृत्य मूलत: मीमांसकानां प्राचीनवैयाकरणानाञ्च मतं निरस्य नागेशभट्टस्य मतं सिद्धान्तरूपेण अस्मिन् आलेखे प्रस्तुतम् । सर्वेऽपि शब्दा: धातुत: निष्पद्यन्ते । अत एव व्युत्पन्ना इति सर्वेषामेवार्थानां धात्वर्थमूलकत्वम् । धात्वर्थो हि फलानुकूलो यत्नसहितो व्यापार: । फलव्यापारयोरुभयोरेव धात्वर्थ इति वैयाकरणसिद्धान्तं स्वीकृत्यैव सकर्मकत्वाकर्मकत्वलक्षणं पाणिनीयव्याकरणशास्त्रसिद्धान्तसम्मत: सुसङ्गतो भवति । स्वार्थव्यापारव्यधिकरणफलवाचकत्वं सकर्मकत्वम्, स्वार्थव्यापार-समानाधिकरणफलवाचकत्वम् अकर्मकत्वम् इति सकर्मकअकर्मकत्वव्यवस्था व्यापारस्य धात्वर्थाभावे न सम्भवति । यद्यपि मीमांसकै: स्वार्थशब्दस्थाने प्रत्ययार्थशब्द: पठ्यते, येन प्रत्ययार्थव्यापारव्यधिकरणफलवाचकत्वं सकर्मकत्वम्, तत्समानाधिकरणफलवाचकत्वम् अकर्मकत्वम् इति । एवमेव प्रत्ययार्थव्यापाराश्रयत्वं कर्तृत्वं तद्व्यधिकरणफलाश्रयत्वं कर्मत्वम् इत्यपि व्यवस्था सङ्गच्छत इति तेषां सिद्धान्त: ।

मीमांसकमतस्वीकारे 'घटं भावयति 'इत्यादौ घटस्य कर्मत्वं न स्यात् । "गतिबुद्धि,,,"(पा.सू., १/४/५२) इति सूत्रेण अणौ य: कर्ता तस्यैव णौ कर्मसंज्ञा भवति । प्रत्ययानां कर्तृकमार्थकत्वे हि कर्तु: कर्मणो वा तिङादिनाम् अभिधानं सम्भवति । शास्त्रे हि अनभिहिते कर्तरि तृतीयाविभक्ते: अभिहिते तु प्रथमाया: कर्मण्यनभिहिते द्वितीयाया: तदभिधाने तु प्रथमाया व्यवस्था कृताऽस्ति । प्रत्ययस्य व्यापारार्थत्वे तु तथाभिधानमेव न सम्भवति । वैयाकरणमते तु प्रत्ययेन कर्तृकर्मादीनाम् अभिधानमनभिधानञ्च भवतीति न दोष: । अत एव धात्वर्थफलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वम्, धात्वर्थफलसमानाधिकरणव्यापारवाचकत्वम् अकर्मकत्वम् इति कौण्डभट्टादय: प्राचीनवैयाकरणा: । यथा चैत्र: तण्डुलं पचति इत्यत्र विक्लितिरूपं फलं तण्डुले, फुत्कारादिव्यापार: च चैत्रे, एवं द्वयो: वैयधिकरण्यं पच्धातोः वर्तत इति पच्धातु: सकर्मक: । उभयो: सर्वथा सामानाधिकरण्यं यथा देवदत्त आस्ते, अयमेव धातु: अकर्मक: । एवञ्च धात्वर्थ: फलं व्यापारश्च तयोरेकनिष्ठतायां-एकाधारे संस्थितौ अकर्मक इत्युच्यते । फलव्यापारयो:-आधारयो: भेदे-भिन्नाश्रये सति सकर्मक इत्युच्यते । यथा नायक: सभां सम्बोधयति, अत्र स्वाभिमुखीकरणं फलं तदाश्रयो: नायक:, अत्र फलव्यापारयो: भिन्नाधारयो: सत्वात् सकर्मक इत्युच्यते ।

तेन हि गमे: फलस्य कर्तृनिष्ठत्वेऽपि नैव तस्याकर्मकत्वं फलस्य कर्मस्थत्वेन च तयो: समानाश्रयत्वाभावात् इति तेषां सिद्धान्त:। इत्थं प्राचीनलक्षणं स्वीकारे अधि+शीङ् इत्यत्र अकर्मकत्वमेव । अत: कर्मणि प्रत्ययस्य साधुत्वं न सिद्ध्यति, क्तप्रत्यय: कर्मण: अनुक्तत्वात् अध्यासितशब्दस्य द्वितीया स्यात् । अत एव स्वसम्मतं लक्षणं उपस्थापयति नागेशभट्ट:-शब्दशास्त्रीयकर्मसंज्ञ कार्थान्वय्यर्थकत्वं सकर्मकत्वम्, शब्दशास्त्रीयकर्मसंज्ञकार्थानन्वय्यर्थकत्वम् अकर्मकत्वम् इति । यथा अध्यासिता भूमय: इत्यत्र शब्दशास्त्रम् "अधिशीङ्स्थासां कर्म" (पा,सू'१/४/४६) इति सूत्रम्, शब्दशास्त्रीयकर्मसंज्ञकार्थ: भूमिपदार्थ:, भूमिपदार्थान्वय्यर्थ: आसनक्रिया, आसनक्रियावाचकत्वमधिपूर्वकं आस्धातो: वर्तते । अत: अधिपूर्वकस्य आस्धातो: सकर्मकत्वं सिद्ध्यति, न तु

फलव्यधिकरणव्यापारवाचकत्वेन । अत्र अन्वयपदेन पृथक्पदजन्यप्रतीतिविषययो: अर्थयो: य आकाङ्क्षाभास्य संसर्ग: स एव ग्राह्य: । तेन चैत्र: जीवति इत्यत्र सकर्मकत्वापत्तिदोषो न । एवञ्च हरि: वैकुण्ठे शेते इत्यत्र केवलं शीङ् धातो: प्रयोग:, अत: कर्मसंज्ञा नैव भवति । शयनरूपाश्रये हरि: तादृश कर्तृद्वारा आश्रय वैकुण्ठपदार्थ: अत: कर्तृद्वारा क्रियाधारत्वात् अधिकरणसंज्ञायां सत्यां सप्तमी विभक्तिः जायते । अयं च धातु: अकर्मक: । यदा अधि इत्यस्य प्रयोगो भवति तदा हरि: वैकुण्ठम् अधिशेते इत्यत्र अधिकरणसंज्ञां प्रबाध्य कर्मसंज्ञा विधीयते । वस्तुतस्तु व्याकरणशास्त्रीयो यः कर्मसंज्ञकार्थ:, तदन्वय्यर्थकत्वं सकर्मकत्वम्, तदनन्वय्यर्थकत्वम् अकर्मकत्वमिति बोध्यम् । एवञ्च सकर्मक-अकर्मकतात्पर्य-अर्थबोधकसूत्राण्यपि इत्थं नागेशभट्टस्याभिमतं प्रमाणयन्तीति निष्कर्ष: ।

## कृतज्ञता ज्ञापनम्

आलेखेऽस्मिन् सकर्मकत्वाकर्मकत्वस्वरूपविश्लेषणक्रमे, सैद्धान्तिकविषयवस्तुनिरूपणे, प्रविध्यादिविषये च परामर्शं प्रदातृभ्यो विद्वज्जनेभ्यो हार्दं धन्यवादं व्यनज्मि ।

## सन्दर्भ सामग्रीसूची

पाणिनिः (सन् २००१). अष्टाध्यायी. चौखम्बासुरभारतीप्रकाशनम् ।

भट्टः, कौण्डः (सन् २००४). वैयाकरणभूषणसार:. (व्याख्याता. प्रभाकरमिश्रः), चौखम्बासुरभारतीप्रकाशनम् ।

भट्टः, नागेशः (सन् २००६). परमलघुमञ्जूषा. (व्याख्याता. लोकमणिदाहालः), चौखम्बासुरभारतीप्रकाशनम् ।

भट्टः, नागेशः (सन् २०११). परमलघुमञ्जूषा. (व्याख्याता. जयशङ्करलाल: त्रिपाठी), चौखम्बा-कृष्णदास-अकादमी ।

भर्तृहरि: (सन् २०१६). वाक्यपदीयम्. सम्पूर्णानन्दसंस्कृतविश्वविद्यालय: ।

भट्टोजिदीक्षितः, (सन् २०२१). वैयाकरणसिद्धान्तकौमुदी. (व्याख्याता. गोविन्दाचार्यः, प्रथमो भागः), चौखम्बासुरभातीप्रकाशनम् ।

वरदाचार्यः, (सन् २००४). लघुसिद्धान्तकौमुदी. भैमीव्याख्यासहिता. (व्याख्याता.भीमसेनशास्त्री, द्वितीयो भागः), नचिकेता भाटिया ।